# 2021

## SANSKRIT — HONOURS

**Paper : CC-1**

**(Classical Sanskrit Literature – Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**(Marks : 10)**

**Unit – II**

1. रघुवंशमहाकाव्यस्य प्रथमसर्गमनुसृत्य राज्ञः दिलीपस्य दैहिकं सौन्दर्यं, तस्य शासनकाले प्रजानामवस्था, तासाम् उन्नतिसाधनाय तेनावलम्बित उपायश्च पाठ्यांशानुसारेण विव्रियन्ताम्। 3+4+3

***अथवा,***

अधोलिखितेषु ***द्वयोः*** आङ्गलभाषया मातृभाषया वा अनुवादः कार्यः। 5×2

(क) वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

(ग) तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव॥

**Section – B**

**(Marks : 20)**

**Unit – I**

2. कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गमनुसृत्य पार्वत्या समाचरितायाः तपस्यायाः कारणं, तपस्यास्थानं च विवृत्य तपश्चरणविषये तस्याः मातापित्रोः सम्मतिरासीन्न वेति सम्यक् लिख्यताम्। 3+1+6

**अथवा,**

(क) अधोलिखितयोः कस्यचित् ***एकस्य*** आंगलभाषया मातृभाषया वा अनुवादः कार्यः। 5

(अ) यथाप्रसिद्धैर्मधुरं शिरोरुहै–
जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते।।

(आ) तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता।।

(ख) अधोलिखितयोः कस्य***चिदेकस्य*** भावः सम्प्रसार्यताम्। 5

(अ) पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः।।

(आ) क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्।।

**Unit – II**

**3.** (क) अधोलिखितयोः कस्य***चिदेकस्य*** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गं व्याख्या कार्या। 7

(अ) कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्
न धर्मवृद्धेषु वयः समीक्षते।।

(आ) शिलाशयां तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु।
व्यलोकयन्नुन्मिषितैस्तड़िन्मयै-
र्महातपःसाक्ष्य इव स्थिताः क्षपाः।।

(ख) अधोलिखितेषु ***त्रयाणानुत्तरं*** लेखनीयम्। तेषु न्यूनतया **द्वयोः** उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्। 1×3

(अ) पार्वत्याः तपश्चरणकाले तपोवनस्य पवित्रता कथं समायाता?

(आ) "न वृक्षवृत्तिव्यतिरिक्तसाधनः"— का वृक्षवृत्तिः?

(इ) पार्वत्याः तपःसाधनकाले आश्रमं कः आगतवान्?

(ई) कोदृशजीवनधारणेन तपसः पराकाष्ठा समायाति?

(उ) कथं पार्वती अपर्णेति नाम्ना संज्ञिता?

**Section – C**

**(Marks : 20)**

**Unit – I**

**4.** किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गे युधिष्ठिराय वनेचरेण निवेदितानि वचनानि पाठ्यांशमनुसृत्य संस्कृतभाषया देवनागरीलिप्या च विव्रियन्ताम्। 10

***अथवा,***

(क) अधोलिखितयोः यथाभिमत***मेकस्य*** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गं व्याख्या कार्या। 5

(अ) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः॥

(आ) तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः॥

(ख) अधोलिखितयोः कस्य***चिदेकस्य*** संस्कृतभाषया देवनागरलिप्या च भावः सम्प्रसार्यताम्। 5

(अ) न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।

(आ) निगूढ़तत्त्वं नयवर्त्म विद्विषाम्।

**Unit – II**

**5.** अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च पूर्णवाक्येन लेखनीयम्। 2×5

(क) कदा मेदिनी कस्मै च स्वयमेव धनानि ददाति?

(ख) कस्य शासनं कैश्च शिरोभिः धार्यते?

(ग) कस्यानुमतिक्रमेण दुर्योधनः कथं च अग्नेः तुष्टिविधानम् अकरोत्?

(घ) केषां गिरः प्रवृत्तिसारा भवन्ति? 'प्रवृत्ति'-शब्दस्य अर्थः कः?

(ङ) निःसपत्नस्यापि दुर्योधनस्य कथमासीद् युधिष्ठिराद् भयाशङ्का?

(च) परराष्ट्रविषयकं तथ्यं कथं दुर्योधनेन विज्ञातम्?

(छ) दुर्योधनस्य कार्यारम्भः कथं ज्ञायते?

## Section – E
## (Marks : 15)
## Unit – I & II

6. अधोलिखितेषु ***त्रयाणां*** टीका लेखनीया। 5×3

(क) माघः,

(ख) जयदेवः,

(ग) बुद्धचरितम्,

(घ) भट्टिकाव्यम्,

(ङ) नैषधचरितम्।

---